# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

## अध्याय ६९

भुक्त्वा तु भाषितं वाक्यं मम राम शुभाक्षरम् ।
प्राञ्जलिः प्रत्युवाचेदं स स्वर्गी रघुनन्दन ॥ १॥

शृणु ब्रह्मन्यथावृत्तं ममैतत्सुखदुःखयोः ।
दुरतिक्रमणीयं हि यथा पृच्छसि मां द्विज ॥ २॥

पुरा वैदर्भको राजा पिता मम महायशाः ।
सुदेव इति विख्यातस्त्रिषु लोकेषु वीर्यवान् ॥ ३॥

तस्य पुत्रद्वयं ब्रह्मन्द्वाभ्यां स्त्रीभ्यामजायत ।
अहं श्वेत इति ख्यातो यवीयान्सुरथोऽभवत् ॥ ४॥

ततः पितरि स्वर्याते पौरा मामभ्यषेचयन् ।
तत्राहं कृतवान्राज्यं धर्मेण सुसमाहितः ॥ ५॥

एवं वर्षसहस्राणि समतीतानि सुव्रत ।
राज्यं कारयतो ब्रह्मन्प्रजा धर्मेण रक्षतः ॥ ६॥

सोऽहं निमित्ते कस्मिंश्चिद्विज्ञातायुर्द्विजोत्तम ।
कालधर्मं हृदि न्यस्य ततो वनमुपागमम् ॥ ७॥

सोऽहं वनमिदं दुर्गं मृगपक्षिविवर्जितम् ।
तपश्चर्तुं प्रविष्टोऽस्मि समीपे सरसः शुभे ॥ ८॥

भ्रातरं सुरथं राज्ये अभिषिच्य नराधिपम् ।
इदं सरः समासाद्य तपस्तप्तं मया चिरम् ॥ ९॥

सोऽहं वर्षसहस्राणि तपस्त्रीणि महामुने ।
तप्त्वा सुदुष्करं प्राप्तो ब्रह्मलोकमनुत्तमम् ॥ १०॥

ततो मां स्वर्गसंस्थं वै क्षुत्पिपासे द्विजोत्तम ।
बाधेते परमोदार ततोऽहं व्यथितेन्द्रियः ॥ ११॥

गत्वा त्रिभुवणश्रेष्ठं पितामहमुवाच ह ।
भगवन्ब्रह्मलोकोऽयं क्षुत्पिपासाविवर्जितः ॥ १२॥

कस्येयं कर्मणः प्राप्तिः क्षुत्पिपासावशोऽस्मि यत् ।
आहारः कश्च मे देव तन्मे ब्रूहि पितामह ॥ १३॥

पितामहस्तु मामाह तवाहारः सुदेवज ।
स्वादूनि स्वानि मांसानि तानि भक्षय नित्यशः ॥ १४॥

स्वशरीरं त्वया पुष्टं कुर्वता तप उत्तमम् ।
अनुप्तं रोहते श्वेत न कदा चिन्महामते ॥ १५॥

दत्तं न तेऽस्ति सूक्ष्मोऽपि वने सत्त्वनिषेविते ।
तेन स्वर्गगतो वत्स बाध्यसे क्षुत्पिपासया ॥ १६॥

स त्वं सुपुष्टमाहारैः स्वशरीरमनुत्तमम् ।
भक्षयस्वामृतरसं सा ते तृप्तिर्भविष्यति ॥ १७॥

यदा तु तद्वनं श्वेत अगस्त्यः सुमहानृषिः ।
आक्रमिष्यति दुर्धर्षस्तदा कृच्छ्राद्विमोक्ष्यसे ॥ १८॥

स हि तारयितुं सौम्य शक्तः सुरगणानपि ।
किं पुनस्त्वां महाबाहो क्षुत्पिपासावशं गतम् ॥ १९॥

सोऽहं भगवतः श्रुत्वा देवदेवस्य निश्चयम् ।
आहारं गर्हितं कुर्मि स्वशरीरं द्विजोत्तम ॥ २०॥

बहून्वर्षगणान्ब्रह्मन्भुज्यमानमिदं मया ।
क्षयं नाभ्येति ब्रह्मर्षे तृप्तिश्चापि ममोत्तमा ॥ २१॥

तस्य मे कृच्छ्रभूतस्य कृच्छ्रादस्माद्विमोक्षय ।
अन्येषामगतिर्ह्यत्र कुम्भयोनिमृते द्विजम् ॥ २२॥

इदमाभरणं सौम्य तारणार्थं द्विजोत्तम ।
प्रतिगृह्णीष्व ब्रह्मर्षे प्रसादं कर्तुमर्हसि ॥ २३॥

तस्याहं स्वर्गिणो वाक्यं श्रुत्वा दुःखसमन्वितम् ।
तारणायोपजग्राह तदाभरणमुत्तमम् ॥ २४॥

मया प्रतिगृहीते तु तस्मिन्नाभरणे शुभे ।
मानुषः पूर्वको देहो राजर्षेः स ननाश ह ॥ २५॥

प्रनष्टे तु शरीरेऽसौ राजर्षिः परया मुदा ।

तृप्तः प्रमुदितो राजा जगाम त्रिदिवं पुनः ॥ २६॥

तेनेदं शक्रतुल्येन दिव्यमाभरणं मम ।
तस्मिन्निमित्ते काकुत्स्थ दत्तमद्भुतदर्शनम् ॥ २७॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com